1

श्री

श्रीगणेशाय नमः॥ राजोवाच॥ यया गुप्तः सहस्राक्षः सवाहान् रिपुसैनिकान्॥
क्रीडन्निव विनिर्जित्य त्रैलोक्या बुभुजे श्रियम्॥१॥ भगवंस्तन्ममाख्याहि वर्म
नारायणात्मकम्॥ यथाततायिनः शत्रून् येन गुप्तोऽजयन्मृधे॥२॥ शुक उ-
वाच॥ वृतः पुरोहितस्त्वाष्ट्रो महेन्द्रायानुपृच्छते॥ नारायणाख्यं वर्माह तदि- ॥१॥
हैकमनाः शृणु॥३॥ विश्वरूप उवाच॥ धौतांघ्रिपाणिराचम्य सपवित्र उदङ्मु-
खः॥ कृतस्वांगकरन्यासो मंत्राभ्यां वाग्यतः शुचिः॥ नारायणमयं वर्म संन

जपेन्मूर्तिमिमं मंत्रमुग्रहरेत ॥ ॐ हरिर्विदध्यान्मम सर्वरक्षां न्यस्तांघ्रिपद्मः पत
गेन्द्रपृष्ठे । दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः ॥१०॥ जले
॥ षु मां रक्षतु मत्स्यमूर्तिर्यादोगणेभ्यो वरुणस्य पाशात् । स्थलेषु मायावटुवामनो
ऽव्यात्त्रिविक्रमः खेवतु विश्वरूपः ॥११॥ दुर्गेष्वटव्याजिमुखादिषु प्रभुः पायान्नृ
सिंहोऽसुरयूथपारिः ॥ विमुंचतो यस्य महाट्टहासं दिशो विनेदुर्न्यपतंश्च गर्भाः ॥ ॥१२॥
॥ रक्षत्वसौ माध्वनि यज्ञकल्पः स्वदंष्ट्रयोन्नीतधरो वराहः । रामोऽद्रिकूटेष्वथ विप
प्रवासे सलक्ष्मणोऽव्याद्भरताग्रजोऽस्मान् ॥१३॥ मामुग्रधर्मादखिलात्प्रमा

आवर्म

रूप आगते ॥४॥ पादयोर्जानुनोर्मूर्ध्नि उदरे हृदयोरसि ॥ मुखे शिरस्यानुपूर्वी
द्वादीनि वि... न्यसेत् ॥५॥ ॐ नमो नारायणायेति विपर्ययं समापयेत् ॥ कर
न्यासं ततः कुर्यात् द्वादशाक्षरविग्रहः ॥६॥ प्रणवादि यकारान्तमंगुल्यंगुष्ठ
सु ॥७॥ न्यसेद् हृदये ॐकारं विकारमनुमूर्द्धनि ॥ षकारं तु भ्रुवोर्मध्ये णकारं
...शिखायां न्यसेत् ॥ वेकारं नेत्रयोर्युग्मात् नकारः सर्वसंधिषु ॥७॥ मकारमस्त्रं वि
न्यसेन्नेत्रमूर्तिर्भवेद् ध्रुवः ॥ सविसर्गं फडन्तं तत्सर्वदिक्षु विनिर्दिशेत् ॥८॥ ॐ वि
ष्णवे नमः फट् इति आत्मानं परमं ध्यायेत् ध्येयं षट्शक्तिभिर्युतम् ॥ विद्यातेज

देवोऽपराह्णे मधुहोग्रधन्वा सायं त्रिधामावतु माधवो माम्॥ दोषे हृषीकेश उतार्द्धरात्रे नि
शीथ एकोऽवतु पद्मनाभः॥१९॥ श्रीवत्सधामाऽपररात्र ईशः प्रत्यूष ईशोऽसिधरो जनार्द
नः॥ दामोदरोऽव्यादनुसंध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्त्तिः॥२०॥ चक्रं युगान्ता
नलतिग्मनेमि भ्रमत्समन्ताद्भगवत्प्रयुक्तं॥ दंदग्धि दंदग्ध्यरिसैन्यमाशु कक्षं यथा
तसखो हुताशः॥२१॥ गदेऽशनिस्पर्शनविस्फुलिंगे निष्पिंढि निष्पिंढ्यजित ॥३॥
से॥ कूष्माण्डवैनायकयक्षरक्षोभूतग्रहां चूर्णय चूर्णयारीन्॥२२॥ त्वं यातुधा
नप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन्॥ दरेन्द्र विद्रावय कृष्णपूरितो भीमस्वनो
दयानि कंपयन्॥२३॥ त्वं तिग्मधारासिवरारि सैन्यमीशप्रयुक्तो मम छिंधि छिंधि

रायणः पातु नरश्च हासात् ॥१५॥ दत्तस्त्वयोगादथ योगनाथः पायाद्गुणेशः कपिलः
र्मबन्धात् ॥१६॥ सनत्कुमारोऽवतु कामदेवाद्धयशीर्षा मां पथि देवहेलनात् ॥ देवर्षिवर्यः
पुरुषार्चनान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥१७॥ धन्वन्तरिर्भगवान्पात्वपथ्यात्
द्वन्द्वाद्भयादृषभो निर्जितात्मा ॥ यज्ञश्च लोकादवताज्जनान्तात् बलो गणात् क्रोधव
शादहीन्द्रः ॥१८॥ द्वैपायनो भगवानप्रबोधात् बुद्धस्तु पाखण्डगणात्प्रमादात् ॥ कल्किः
कलेः कालमलात्प्रपातु धर्मावनायोरुकृतावतारः ॥१९॥ मां केशवो गदया प्रातरव्यात् गो
विन्द आसंगवमात्तवेणुः ॥ नारायणः पातु उदात्तशक्तिर्मध्यंदिने विष्णुररीन्द्रपाणिः ॥२०॥

भि गायत्री भूतेशान्तः स्थमापद्या ॥३०॥ तेनैव संप्रयुक्तेन सर्वतो भावानाहि ॥पा
तु सर्वे स्वरूपेण सदा सर्वत्र सर्वगः ॥३१॥ विद्धि मां हृदि मध्ये अमृतः समन्तादेव हि
गवान्नारसिंहः ॥ प्रह्लादप्रोक्तमपरं नमस्ते गतागतं सम्पन्नाः ॥३२॥
एवं विद्यात्मानं धर्मे नारायणात्मकम् ॥ विनिर्मुक्तं जपमात्रेण न दुःखान्तो भु
स्यान्न ॥३३॥ इतं प्रमाणं तु पंचपद्यानि वक्तुं ॥ एतद्वा संस्थितेन ॥३४॥
सा मे विमुच्यते ॥३५॥ न कुन्तपृष्ठे मध्ये पतन्स्यापि पापधारणो भवेत् ॥ राजद
श्री नहीं विंभी यायाद्विमर्पवद्धीहविन ॥३६॥ इमांविपापुराकाम्विनको ॥२

भावम

चर्मन् शतचन्द्र छादय द्विषामघोनां हर पापचक्षुषाम् ॥२३॥ यन्नो भयं ग्रहे
भ्यो केतुभ्यो नृभ्य एव वा ॥ सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्यो हंस एव वा ॥२४॥ सर्वा
ण्येतानि भगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयान्तु संक्षयं सद्यो ये नः श्रेयः प्रतीपकाः ॥२५॥
ो भगवांस्तोत्रस्तोभः छन्दोमयः प्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्यो विष्वक्सेनः स्वनाम
॥२७॥ सर्वापद्भ्यो हरेर्नामरूपयानायुधानि च ॥ बुद्धीन्द्रियमनः प्राणान्पान्तु
पार्षदभूषणाः ॥२८॥ यथा हि भगवानेव वस्तुतः सदसच्च यत् ॥ सत्येनानेन नः सर्वे
यान्तु नाशमुपद्रवाः ॥२९॥ यथैकात्म्यानुभावानां विकल्परहितः स्वयं ॥ भूषणायुध

म्

S

…को धारयन्द्विजः ॥ योगधारणया स्वांगं जहौ समरुधन्वनि ॥३६॥ तस्योपरि विमानेन
गंधर्वपतिरेकदा ॥ ययौ चित्ररथः स्त्रीभिर्वृतो यत्र द्विजक्षयः ॥३७॥ गगनान्न्यपतत्सद्यः
सविमानो ह्यवाक्शिराः ॥ स वालखिल्यवचनादस्थीन्यादाय विस्मितः ॥३८॥ प्रास्य ॥५॥
प्राचीसरस्वत्यां स्नात्वा धाम स्वमन्वगात् ॥ शुक उवाच ॥ य इदं शृणुयात्काले यो
धारयति चादृतः ॥ तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥३९॥ एतां विद्यामधि
गतो विश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मीं बुभुजे विनिर्जित्य मृधेऽसुरान् ॥४०॥
इति श्रीमद्भागवते महापुराणे षष्ठस्कन्धे नारायणवर्मनामाष्टमोऽध्यायः ॥८॥ ॐ

S

नि२